# puruSHasUktam

# पुरुषसूक्तम्

(कृष्णयजुर्वेद)

www.geocities.com/udakashanti
Last updated on: Saturday, April 22, 2006

# पुरुषसूक्तम्

सहस्रशीर्~षा पुरुषः । सहस्राक्षस्सहस्रपात्~ ।
स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुष एवेदग्ं सर्वम् । यद्भूतँय्यच्च भव्यम् ।
उतामृतत्वस्येशानः । यदन्नेनातिरोहति ॥२॥
एतावानस्य महिमा । अतो ज्यायाग्~श्च पूरुषः ।
पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतन्दिवि ॥३॥
त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवात्पुनः ।
ततो विश्वँव्व्यक्रामत्~ । साशनानशने अभि ॥४॥
तस्माद्विराडजायत । विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥५॥
यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः ॥६॥

सप्तास्यासन् परिधयः । त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वानाः । अबध्नन् पुरुषं पशुम् ॥७॥
तँय्यज्ञं बर्~हिषि प्रौख्षन्न्~ । पुरुषञ्जातमग्रतः ।
तेन देवा अयजन्त । साध्या ऋषयश्चये ॥८॥
तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् ।
पशूग्~स्ताग्~श्चक्रे वायव्यान्~ । आरण्यान् ग्राम्याश्च ये ॥९॥
तस्माद्यज्ञात्सर्वहुतः । ऋचस्सामानि जज्ञिरे ।
छन्दाग्ंसि जज्ञिरे तस्मात्~ । यजुस्तस्मादजायत ॥१०॥
तस्मादश्वा अजायन्त । ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्~ । तस्माज्जाता अजावयः ॥११॥
यत्पुरुषँव्व्यदधुः । कतिधा व्यकल्पयन्न्~ ।
मुखङ्किमस्य कौ बाहू । का ऊरू पादावुच्येते ॥१२॥
ब्राह्मणोऽस्य मुखमासीत्~ । बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः । पद्भ्याग्ं शूद्रो अजायत ॥१३॥

चन्द्रमा मनसो जातः । चख्षोस्सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत ॥१४॥
नाभ्या आसीदन्तरिख्षम् । शीर्ष्णो द्यौस्समवर्तत ।
पद्भ्यां भूमिर्दिशश्श्रोत्रात्~ । तथा लोकाग्ं अकल्पयन्न्~ ॥१५॥
वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णन्तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्~, यदास्ते ॥१६॥
धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान् प्रदिशश्चतस्रः ।
तमेवँव्विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ॥१७॥
यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन्न्~ ।
ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे साध्यास्सन्ति देवाः ॥१८॥
अद्भ्यस्संभूतः पृथिव्यै रसाच्च । विश्वकर्मणस्समवर्तताधि ।
तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे ॥१९॥
वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णन्तमसः परस्तात्~ ।
तमेवँव्विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय ॥२०॥

प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ।
तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः ॥२१॥
यो देवेभ्य आतपति । यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये ॥२२॥
रुचं ब्राह्मञ्जनयन्तः । देवा अग्रे तदब्रुवन्न्~ ।
यस्त्वैवं ब्राह्मणो विद्यात्~ । तस्य देवा असन्वशे ॥२३॥
ह्रीश्चते लख्ष्मीश्चपत्न्यौ । अहोरात्रे पार्श्वे ।
नख्षत्राणि रूपम् । अश्विनौ व्यात्तम् ।
इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥२४॥